अम्बरीष उवाच ।
"कीदृशाय प्रदातव्यं महादानं द्विजातये ।
विदुषे वा निराधारे साचारेऽविदुषे मुने ! ॥
एतन्मे सर्व्वमाख्याहि यथातथ्यं द्विजोत्तम ! ।
उत्तारयति संगृह्य दातारं दानमेव हि ॥
वशिष्ठ उवाच ।
जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्तिष्ठेत् नित्यं स द्विज उच्यते ॥
न जातिर्न कुलं राजन् ! न स्वाध्यायः श्रुतं न च ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥
क्षत्त्रियः । वैश्यः । इति मेदिनी । जे, १० ॥
(यथा, याज्ञवल्क्ये । १ । ३९ ।
"मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्त्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
दन्तः । (यथा,—
"न छित्वा द्विजैर्भक्षयेत् ॥" इति चरके सूत्र-स्थानेऽष्टमेऽध्याये ॥) अण्डजः । स पक्षिसर्पमत्स्यादिः । इत्यमरः । ३ । ३ । ३० ॥ (यथा, रघुः । १२ । २२ ।
"ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ॥")
तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ द्विजाते, त्रि ॥
द्विजकुत्सितः, पुं, (द्विजानां द्विजेषु वा कुत्सितः । द्विजानां तद्भक्षणनिषेधात् तथात्वम् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः शब्दमाला च ॥
द्विजदासः, पुं, (द्विजानां दासः ।) शूद्रः । इति राजनिर्घण्टः ॥ द्विजानां दासे, त्रि ॥
द्विजन्मा, [न्] पुं, (द्वे जन्मनी यस्य ।) ब्राह्मणः । (यथा, देवीभागवते । ५ । ५ । ३ ।
"यतीनां भूषणं ज्ञानं सन्तोषो हि द्विजन्मनाम् ॥")
दन्तः । पक्षी । इति शब्दरत्नावली ॥ क्षत्त्रियः । वैश्यश्च । त्रि, द्विवारजन्मयुक्तः । (द्वाभ्यां जायमानः । यथा, ऋग्वेदे । १ । १४० । २ ।
"अभिद्विजन्मा त्रिवृदन्नमृज्यते ।
संवत्सरे वावृधे जग्धमीपुनः ॥"
"द्वाभ्यामरणीभ्यां जायमानत्वात् यद्वा मथनेनाधानसंस्कारेण चोत्पन्नत्वात् द्विजन्मत्वम् ।"
इति तद्भाष्ये सायनः ॥)
द्विजपतिः, पुं, (द्विजानां पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागते ।१।११।२६।
"क्रूराणि चैवमादीनि भाषणानि वृहस्पतेः ।
श्रुत्वा द्विजपतिः शीघ्रं निर्गतं सदनाद्बहिः ॥")
द्विजप्रपा, स्त्री, (द्विजानां पक्षिणां प्रपा ।) आलवालम् । तत्पर्य्यायः । तल्लम् २ विल्लम् ३ तलम् ४ । इति त्रिकाण्डशेषः ॥
द्विजप्रिया, स्त्री, (द्विजानां याज्ञिकब्राह्मणादीनां प्रिया ।) सोमलता । इति राजनिर्घण्टः ॥ द्विजस्य प्रियवस्तुनि, त्रि ॥
द्विजबन्धुः, पुं, (द्विजस्य बन्धुरिव ।) अब्राह्मणः स भट्टदेवज्ञादिः । यथा,—
"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।"
इति स्मृतिः ॥
द्विजब्रुवः, पुं, (आत्मानं द्विजं ब्रूते इति । ब्रू + कः ।) ब्राह्मणब्रुवः । स च जातिमात्रोपजीवी ब्राह्मणः । इति हेमचन्द्रः । ३ । ५१९ ॥ यथा,—
"सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्रमनन्तं वेदपारगे ॥"
इति स्मृतिः ॥
द्विजराजः, पुं, (द्विजानां राजा । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९ । इति टच् ।) चन्द्रः । (यथा, देवीभागवते । १ । ११ । ७२ ।
"द्विजराजस्तु तच्छ्रुत्वा भृगोर्व्वचनमद्भुतम् ।
ददावतत्प्रियां भार्य्यां गुरोर्गर्भवतीं शुभाम् ॥")
कर्पूरः । इत्यमरः ॥ अनन्तः । गरुड़ः । इति मेदिनी । जे, ३२ ॥
द्विजलिङ्गी, [न्] पुं, (द्विजस्य लिङ्गं चिह्नमस्यास्तीति । इनिः ।) क्षत्त्रियः । इति त्रिकाण्डशेषः ॥ ब्राह्मणवेशधारिणि, त्रि ॥ (यथा, मनुः । ९ । २२४ ।
"द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा ।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विज-लिङ्गिनः ॥")
द्विजव्रणः, पुं, (द्विजस्य दन्तस्य व्रणः ।) दन्तार्वुदः । इति राजनिर्घण्टः ॥
द्विजशप्तः, पुं, (द्विजैः शप्तः ।) राजमाषः । इति शब्दचन्द्रिका ॥ वरवटी इति भाषा ॥
द्विजसेवकः, पुं, (द्विजानां सेवकः ।) शूद्रः । इति शब्दरत्नावली ॥ त्रिवर्णसेवाकर्त्तरि, त्रि ॥
द्विजा, स्त्री, (द्विर्जायते इति । जन् + डः । टाप् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः ।२।४।१२०॥ (अस्याः पर्य्यायो यथा,—
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्त्री स्मृता कौन्ती हरेणुका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भार्गी । इति मेदिनी । जे, १० ॥ पालङ्की । इति शब्दचन्द्रिका ॥
द्विजाङ्गी, स्त्री, (द्विजस्य पक्षिणोऽङ्गमिव अङ्गं यस्याः । ङीप् ।) कटुका । इति राजनिर्घण्टः ॥
द्विजातिः, पुं, (द्वे जाती यस्य ।) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥ (यथा, महाभारते । १ । ७४ । ६१ ।
"वेदेष्वपि वदन्तीमं मन्त्रजातं द्विजातयः ॥")
अण्डजः । इति मेदिनी । ते, ११४ ॥ क्षत्त्रियः । वैश्यः । यथा,—
"शूद्रो द्विजातिभिर्जातो न भूमेर्भागमर्हति ।"
इति स्मृतिः ॥
(यथा च मनुः । १० । ४ ।
"ब्राह्मणः क्षत्त्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥")
द्विजायनी, स्त्री, (द्विजः अय्यते ज्ञायतेऽनयेति । अय + करणे ल्युट् । स्त्रियां ङीप् ।) यज्ञोपवीतम् । इति शब्दरत्नावली ॥
द्विजालयः, पुं, (द्विजानां पक्षिणामालयः ।) कोटरम् । इति शब्दचन्द्रिका ॥ द्विजानां गृहञ्च ॥
द्विजिह्वः, पुं, (द्वे जिह्वे यस्य ।) सर्पः । (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"व्यालश्चाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।
चक्षुःश्रवा दन्दशूको गूढ़पात्पन्नगोरगाः ॥")
सूचकः । इत्यमरः । ३ । ३ । १३३ ॥ (यथा, माघे । १ । ६३ ।
"परस्य मर्म्माविधमुज्झतां निजं
द्विजिह्वतादोषमजिह्मगामिभिः ॥")
खलः । इति मेदिनी । वे, १२ ॥ चौरः । दुःसाध्यः । इति शब्दरत्नावली ॥ (रोग-विशेषः । यथा, सुश्रुते निदानस्थाने १४ अध्याये ।
"ज्ञेयो द्विजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"
त्रि, द्विजिह्वाविशिष्टः । यथा, महाभारते । १ । ३४ । २४ ।
"द्विजिह्वाश्च कृताः सर्पा गरुड़ेन महात्मना ॥")
द्विजोत्तमः, पुं, (द्विजेषु उत्तमः ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, मनुः । २ । ४९ ।
"भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ॥")
द्विट्, [ष्] पुं, (द्वेष्टीति । द्विष् + क्विप् ।) शत्रुः । इत्यमरः । २ । ८ । ११ ॥ (यथा, महाभारते । ४ । १६ । ७ ।
"तस्मिन् जीवति पापिष्ठे सेनावाहे मम द्विषि ।
तत् कर्म्म कृतवत्यद्य कथं निद्रां निषेवसे ॥")
द्वेष्टरि, त्रि । (यथा, रघौ । ३ । ४५ ।
"त्रिलोकनाथेन सदा मखद्विष-
स्त्वया नियम्या ननु दिव्यचक्षुषा ॥")
द्विठः, पुं, वह्निजाया । स्वाहा । विसर्गः । इति पैत्कारीयतन्त्रम् ॥ ठकारद्वयम् ॥
द्वितयं, क्ली, (द्वौ अवयवौ अस्य । द्वि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।) द्वयम् । इति हेमचन्द्रः । २ । ५० । १२ ॥ (यथा, भागवते । ५ । २२ । ४ ।
"अत ऊर्द्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते ॥" द्वित्वसंख्याविशिष्टे, त्रि । यथा, रघुः । ८ । ९० ।
"द्रुमसानुमतां किमन्तरं
यदि वायौ द्वितयेऽपि ते चलाः ॥")
द्वितीयं, त्रि, (द्वयोः पूरणम् । द्वि + "द्वेस्तीयः ।" ५ । २ । ५४ । इति तीयः ।) द्वयम् । इति हेमचन्द्रः । ३ । १७७ ॥ (यथा, रघुः ।२।४९।
"तथा विदुर्मां मुनयः शतक्रतुं
द्वितीयगामी न हि शब्द एष नः ॥")
द्वितीयः, पुं, (द्वयोः पूरणः । आत्मनो द्वितीयत्वादेवास्य तथात्वम् ।) पुत्त्रः । इति त्रिकाण्डशेषः ॥
द्वितीया, स्त्री, (द्वितीय + टाप् ।) गेहिनी । भार्य्या । इत्यमरः । २ । ६ । ५ ॥ तिथिविशेषः । सा चन्द्रस्य द्वितीयकलाक्रियारूपा । शुक्लपक्षे २ कृष्णपक्षे १७ एतदङ्कबोधिता । इति ज्योतिषम् ॥ * ॥ सा च अश्विनीकुमारयोर्जन्मतिथि यथा,—